# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ६३

प्रवृत्ते सङ्कुले तस्मिन्घोरे वीरजनक्षये ।
अङ्गदः कम्पनं वीरमाससाद रणोत्सुकः ॥ १॥

आहूय सोऽङ्गदं कोपात्ताडयामास वेगितः ।
गदया कम्पनः पूर्वं स चचाल भृशाहतः ॥ २॥

स संज्ञां प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः ।
अर्दितश्च प्रहारेण कम्पनः पतितो भुवि ॥ ३॥

हतप्रवीरा व्यथिता राक्षसेन्द्रचमूस्तदा ।
जगामाभिमुखी सा तु कुम्भकर्णसुतो यतः ।
आपतन्तीं च वेगेन कुम्भस्तां सान्त्वयच्चमूम् ॥ ४॥

स धनुर्धन्विनां श्रेष्ठः प्रगृह्य सुसमाहितः ।
मुमोचाशीविषप्रख्याञ्शरान्देहविदारणान् ॥ ५॥

तस्य तच्छुशुभे भूयः सशरं धनुरुत्तमम् ।
विद्युदैरावतार्चिष्मद्द्वितीयेन्द्रधनुर्यथा ॥ ६॥

आकर्णकृष्टमुक्तेन जघान द्विविदं तदा ।
तेन हाटकपुङ्खेन पत्रिणा पत्रवाससा ॥ ७॥

सहसाभिहतस्तेन विप्रमुक्तपदः स्फुरन् ।
निपपाताद्रिकूटाभो विह्वलः प्लवगोत्तमः ॥ ८॥

मैन्दस्तु भ्रातरं दृष्ट्वा भग्नं तत्र महाहवे ।
अभिदुद्राव वेगेन प्रगृह्य महतीं शिलाम् ॥ ९॥

तां शिलां तु प्रचिक्षेप राक्षसाय महाबलः ।
बिभेद तां शिलां कुम्भः प्रसन्नैः पञ्चभिः शरैः ॥ १०॥

सन्धाय चान्यं सुमुखं शरमाशीविषोपमम् ।
आजघान महातेजा वक्षसि द्विविदाग्रजम् ॥ ११॥

स तु तेन प्रहारेण मैन्दो वानरयूथपः ।
मर्मण्यभिहतस्तेन पपात भुवि मूर्छितः ॥ १२॥

अङ्गदो मातुलौ दृष्ट्वा पतितौ तौ महाबलौ ।
अभिदुद्राव वेगेन कुम्भमुद्यतकार्मुकम् ॥ १३॥

तमापतन्तं विव्याध कुम्भः पञ्चभिरायसैः ।
त्रिभिश्चान्यैः शितैर्बाणैर्मातङ्गमिव तोमरैः ॥ १४॥

सोऽङ्गदं विविधैर्बाणैः कुम्भो विव्याध वीर्यवान् ।
अकुण्ठधारैर्निशितैस्तीक्ष्णैः कनकभूषणैः ॥ १५॥

अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रो न कम्पते ।
शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह ॥ १६॥

स प्रचिच्छेद तान्सर्वान्बिभेद च पुनः शिलाः ।
कुम्भकर्णात्मजः श्रीमान्वालिपुत्रसमीरितान् ॥ १७॥

आपतन्तं च सम्प्रेक्ष्य कुम्भो वानरयूथपम् ।
भ्रुवोर्विव्याध बाणाभ्यामुल्काभ्यामिव कुञ्जरम् ॥ १८॥

अङ्गदः पाणिना नेत्रे पिधाय रुधिरोक्षिते ।
सालमासन्नमेकेन परिजग्राह पाणिना ॥ १९॥

तमिन्द्रकेतुप्रतिमं वृक्षं मन्दरसंनिभम् ।
समुत्सृजन्तं वेगेन पश्यतां सर्वरक्षसाम् ॥ २०॥

स चिच्छेद शितैर्बाणैः सप्तभिः कायभेदनैः ।
अङ्गदो विव्यथेऽभीक्ष्णं ससाद च मुमोह च ॥ २१॥

अङ्गदं व्यथितं दृष्ट्वा सीदन्तमिव सागरे ।
दुरासदं हरिश्रेष्ठा राघवाय न्यवेदयन् ॥ २२॥

रामस्तु व्यथितं श्रुत्वा वालिपुत्रं महाहवे ।
व्यादिदेश हरिश्रेष्ठाञ्जाम्बवत्प्रमुखांस्ततः ॥ २३॥

ते तु वानरशार्दूलाः श्रुत्वा रामस्य शासनम् ।
अभिपेतुः सुसङ्क्रुद्धाः कुम्भमुद्यतकार्मुकम् ॥ २४॥

ततो द्रुमशिलाहस्ताः कोपसंरक्तलोचनाः ।
रिरक्षिषन्तोऽभ्यपतन्नङ्गदं वानरर्षभाः ॥ २५॥

जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ।

कुम्भकर्णात्मजं वीरं क्रुद्धाः समभिदुद्रुवुः ॥ २६ ॥

समीक्ष्याततस्तांस्तु वानरेन्द्रान्महाबलान् ।
आववार शरौघेण नगेनेव जलाशयम् ॥ २७ ॥

तस्य बाणचयं प्राप्य न शोकेरतिवर्तितुम् ।
वानरेन्द्रा महात्मानो वेलामिव महोदधिः ॥ २८ ॥

तांस्तु दृष्ट्वा हरिगणाञ्शरवृष्टिभिरर्दितान् ।
अङ्गदं पृष्ठतः कृत्वा भ्रातृजं प्लवगेश्वरः ॥ २९ ॥

अभिदुद्राव वेगेन सुग्रीवः कुम्भमाहवे ।
शैलसानु चरं नागं वेगवानिव केसरी ॥ ३० ॥

उत्पाट्य च महाशैलानश्वकर्णान्धवान्बहून् ।
अन्यांश्च विविधान्वृक्षांश्चिक्षेप च महाबलः ॥ ३१ ॥

तां छादयन्तीमाकाशं वृक्षवृष्टिं दुरासदाम् ।
कुम्भकर्णात्मजः श्रीमांश्चिच्छेद निशितैः शरैः ॥ ३२ ॥

अभिलक्ष्येण तीव्रेण कुम्भेन निशितैः शरैः ।
आचितास्ते द्रुमा रेजुर्यथा घोराः शतघ्नयः ॥ ३३ ॥

द्रुमवर्षं तु तच्छिन्नं दृष्ट्वा कुम्भेन वीर्यवान् ।
वानराधिपतिः श्रीमान्महासत्त्वो न विव्यथे ॥ ३४ ॥

निर्भिद्यमानः सहसा सहमानश्च ताञ्शरान् ।
कुम्भस्य धनुराक्षिप्य बभञ्जेन्द्रधनुःप्रभम् ॥ ३५ ॥

अवप्लुत्य ततः शीघ्रं कृत्वा कर्म सुदुष्करम् ।
अब्रवीत्कुपितः कुम्भं भग्नशृङ्गमिव द्विपम् ॥ ३६ ॥

निकुम्भाग्रज वीर्यं ते बाणवेगं तदद्भुतम् ।
संनतिश्च प्रभावश्च तव वा रावणस्य वा ॥ ३७ ॥

प्रह्लादबलिवृत्रघ्नकुबेरवरुणोपम ।
एकस्त्वमनुजातोऽसि पितरं बलवत्तरः ॥ ३८ ॥

त्वामेवैकं महाबाहुं शूलहस्तमरिन्दमम् ।
त्रिदशा नातिवर्तन्ते जितेन्द्रियमिवाधयः ॥ ३९ ॥

वरदानात्पितृव्यस्ते सहते देवदानवान् ।
कुम्भकर्णस्तु वीर्येण सहते च सुरासुरान् ॥ ४० ॥

धनुषीन्द्रजितस्तुल्यः प्रतापे रावणस्य च ।
त्वमद्य रक्षसां लोके श्रेष्ठोऽसि बलवीर्यतः ॥ ४१ ॥

महाविमर्दं समरे मया सह तवाद्भुतम् ।
अद्य भूतानि पश्यन्तु शक्रशम्बरयोरिव ॥ ४२ ॥

कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलम् ।
पातिता हरिवीराश्च त्वयैते भीमविक्रमाः ॥ ४३ ॥

उपालम्भभयाच्चापि नासि वीर मया हतः ।
कृतकर्मा परिश्रान्तो विश्रान्तः पश्य मे बलम् ॥ ४४ ॥

तेन सुग्रीववाक्येन सावमानेन मानितः ।
अग्नेराज्यहुतस्येव तेजस्तस्याभ्यवर्धत ॥ ४५ ॥

ततः कुम्भः समुत्पत्य सुग्रीवमभिपद्य च ।
आजघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना ॥ ४६ ॥

तस्य चर्म च पुस्फोट सञ्जज्ञे चास्य शोणितम् ।
स च मुष्टिर्महावेगः प्रतिजघ्नेऽस्थिमण्डले ॥ ४७ ॥

तदा वेगेन तत्रासीत्तेजः प्रज्वालितं मुहुः ।
वज्रनिष्पेषसञ्जातज्वाला मेरौ यथा गिरौ ॥ ४८ ॥

स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः ।
मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ ४९ ॥

अर्चिःसहस्रविकचं रविमण्डलसप्रभम् ।
स मुष्टिं पातयामास कुम्भस्योरसि वीर्यवान् ॥ ५० ॥

मुष्टिनाभिहतस्तेन निपपाताशु राक्षसः ।
लोहिताङ्ग इवाकाशाद्दीप्तरश्मिर्यदृच्छया ॥ ५१ ॥

कुम्भस्य पततो रूपं भग्नस्योरसि मुष्टिना ।
बभौ रुद्राभिपन्नस्य यथारूपं गवां पतेः ॥ ५२ ॥

तस्मिन्हते भीमपराक्रमेण
प्लवङ्गमानामृषभेण युद्धे ।
मही सशैला सवना चचाल
भयं च रक्षांस्यधिकं विवेश ॥ ५३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo

Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com